॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## श्री नरसिंह कवच

ॐ नमो भगवते वासुदेवाय

श्रीमद्भागवत रसिक कुटुंब

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्री नरसिंह कवच

उग्रं(म्) वीरं(म्) महाविष्णुं(ञ्) ज्वलन्तं(म्) सर्वतोमुखम्।
नृसिंहं(म्) भीषणं(म्) भद्रं(म्), मृत्योर्मृत्युं(न्) नमाम्यहम् ॥

## ॥ अथ श्री नृसिंहकवचस्तोत्रम् ॥

नृसिंहकवचम् वक्ष्ये, प्रह्लादेनोदितं पुरा ।
सर्वरक्षाकरं पुण्यं, सर्वोपद्रवनाशनम् ॥ 1 ॥

सर्व संपत्करं(ञ्) चैव, स्वर्गमोक्षप्रदायकम् ।
ध्यात्वा नृसिंहं(न्) देवेशं, हेमसिंहासनस्थितम् ॥ 2 ॥

विवृतास्यं(न्) त्रिनयनं, शरदिंदुसमप्रभम् ।
लक्ष्म्यालिंगितवामांगम्, विभूतिभिरुपाश्रितम् ॥ 3 ॥

चतुर्भुजं(ङ्) कोमलांगम्, स्वर्णकुण्डलशोभितम् ।
सरोजशोभितोरस्कं, रत्नकेयूरमुद्रितम् ॥ 4 ॥

तप्तकां(ञ्)चनसं(ङ्)काशं, पीतनिर्मलवाससम् ।
इंद्रादिसुरमौलिस्थ-स्फुरन्माणिक्यदीप्तिभि: ॥ 5 ॥

विराजितपदद्वंद्वं, शंखचक्रादि हेतिभि:।
गरुत्मता च विनयात्, स्तूयमानं मुदान्वितम् ॥ 6 ॥

स्वहृतकमलसंवासम्, कृत्वा तु कवचम् पठेत्।
नृसिंहो मे शिर:(फ्) पातु, लोकरक्षार्थसंभव: ॥ 7 ॥

सर्वगोऽपि स्तंभवासः(फ्), फालं मे रक्षतु ध्वनिम् ।
नृसिंहो मे दृशौ पातु, सोमसूर्याग्निलोचनः ॥ 8 ॥

स्मृतिं मे पातु नृहरिर्-मुनिवर्यस्तुतिप्रियः ।
नासं मे सिंहनासास्तु, मुखं लक्ष्मीमुखप्रियः ॥ 9 ॥

सर्वविद्याधिपः(फ्) पातु, नृसिंहो रसनां मम ।
वक्त्रं पात्विन्दुवदनं, सदा प्रह्लादवंदितः ॥ 10 ॥

नृसिंहः(फ्) पातु मे कण्ठं, स्कंधौ भूभरणांतकृत् ।
दिव्यास्त्रशोभितभुजो, नृसिंहः(फ्) पातु मे भुजौ ॥ 11 ॥

करौ मे देववरदो, नृसिंहः(फ्) पातु सर्वतः ।
हृदयं योगिसाध्यश्च, निवासं पातु मे हरिः ॥ 12 ॥

मध्यं पातु हिरण्याक्ष-वक्षः(ख्)कुक्षिविदारणः ।
नाभिं मे पातु नृहरिः(स्), स्वनाभि ब्रह्मसंस्तुतः ॥ 13 ॥

ब्रह्माण्डकोटयः(ख्) कट्यां, यस्यासौ पातु मे कटिम् ।
गुह्यं मे पातु गुह्यानां, मंत्राणां(ङ्) गुह्यरूपदृक ॥ 14 ॥

ऊरू मनोभवः(फ्) पातु, जानुनी नररूपधृक् ।
जंघे पातु धराभार-हर्ता योऽसौ नृकेसरी ॥ 15 ॥

सुरराज्यप्रदः(फ्) पातु, पादौ मे नृहरीश्वरः ।
सहस्रशीर्षा पुरुषः(फ्), पातु मे सर्वशस्तनुम् ॥ 16 ॥

महोग्रः(फ्) पूर्वतः(फ्) पातु, महावीराग्रजोऽग्नितः।
महाविष्णुर्दक्षिणे तु, महाज्वालस्तु नैर्ऋतौ ॥ 17 ॥

पश्चिमे पातु सर्वेशो, दिशि मे सर्वतोमुखः ।
नृसिंहः(फ्) पातु वायव्यां, सौम्यां भूषणविग्रहः ॥ 18 ॥

ईशान्यां पातु भद्रो मे, सर्वमंगलदायकः ।
संसारभयतः(फ्) पातु, मृत्योर्मृत्युर्नृकेसरी ॥ 19 ॥

इदं(न्) नृसिंहकवचं, प्रह्लादमुखमण्डितम् ।
भक्तिमान् यः(फ्) पठेन्नित्यं, सर्वपापैः(फ्) प्रमुच्यते ॥ 20 ॥

पुत्रवान् धनवान् लोके, दीर्घायुरुपजायते ।
यं यं(ङ्) कामयते कामं(न्), तं(न्) तं प्रप्नोत्यसंशयम् ॥ 21 ॥

सर्वत्र जयमाप्नोति, सर्वत्र विजयी भवेत् ।
भूम्यन्तरीक्षदिव्यानां(ङ्), ग्रहाणां विनिवारणम् ॥ 22 ॥

वृश्चिकोरगसंभूत विषापहरणं परम् ।
ब्रह्मराक्षसयक्षाणां(न्), दूरोत्सारणकारणम् ॥ 23 ॥

भूर्जे वा तालपत्रे वा, कवचं लिखितं शुभम् ।
करमूले धृतं येन, सिध्येयुः(ख्) कर्मसिद्धयः ॥ 24 ॥

देवासुरमनुष्येषु, स्वं स्वमेव जयं लभेत् ।
एकसंध्यं(न्) त्रिसंध्यं वा, यः(फ्) पठेन्नियतो नरः ॥ 25 ॥

सर्वमंगलमांगल्यं, भुक्तिं मुक्तिं(ञ्) च विंदति ।
द्वात्रिंशतिसहस्राणि, पठेत् शुद्धात्मनां(न्) नृणाम् ॥ 26 ॥

कवचस्यास्य मंत्रस्य, मंत्रसिद्धिः(फ्) प्रजायते।
अनेन मंत्रराजेन, कृत्वा भस्माभिमंत्रणम् ॥ 27 ॥

तिलकं विन्यसेद्यस्तु, तस्य ग्रहभयं हरेत्।
त्रिवारं(ञ्) जपमानस्तु, दत्तं वार्यभिमंत्र्य च ॥ 28 ॥

प्राशयेद्यो नरो मंत्रं(न्), नृसिंहध्यानमाचरेत् ।
तस्य रोगाः(फ्) प्रणश्यंति, ये च स्युः(ख्) कुक्षिसंभवाः ॥ 29 ॥

किमत्र बहुनोक्तेन, नृसिंहसदृशो भवेत् ।
मनसा चिंतितं यत्तु, स तच्चाऽप्नोत्यसंशयम् ॥ 30 ॥

गर्जंतं(ङ्) गर्जयंतं(न्) निजभुजपटलं स्फोटयंतं हठंतं
रूप्यंतं(न्) तापयंतं(न्) दिवि भुवि दितिजं(ङ्) क्षेपयंतं रसंतं

गर्जन्तं(ङ्) गर्जयन्तं(न्) निजभुजपटलं स्फोटयन्तं हठन्तं रूप्यन्तं(न्)
तापयन्तं(न्) दिवि भुवि दितिजं(ङ्) क्षेपयन्तं(ङ्) क्षिपन्तम् ॥

क्रन्दन्तं रोषयन्तं(न्) दिशि दिशि सततं संहरन्तं भरन्तं ।
वीक्षन्तं(ङ्) घूर्णयन्तं शरनिकरशतैर्दिव्यसिंहं(न्) नमामि ॥ 31 ॥

॥ इति श्रीब्रह्माण्डपुराणे प्रह्लादोक्तं श्रीनरसिंहकवचं सम्पूर्णम् ॥